मनोगतम् [०२.२७]- ८०-उपाख्यानम् ‘मनकीबात’, प्रसा.तिथि: - २९-ऑगस्ट्’२०२१

[भाषान्तरम् - डॉ.श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

*****

मम प्रियाः देशवासिनः, नमस्कारः ।

वयं जानीमः - अद्य मेजर-ध्यानचंद-वर्यस्य जन्म-जयंती वर्तते | तथा च, अस्माकं देशः तस्य स्मृतौ एतत् राष्ट्रिय-खेलादिवसरूपेण अपि आमानयति | अहं विचारयन् आसं यत्, कदाचित् अस्मिन् काले मेजर-ध्यानचंदवर्यस्य आत्मा यत्रापि भवेत्, अतितरां प्रसन्नताम् अनुभवन् स्यात् | यतो हि जगति भारतीय-हॉकी-क्रीडायाः डिण्डिम-घोषस्य कार्यं ध्यानचंद-महोदयस्य हॉकी-खेलया एव कृतम् | तथा च, दशक-चतुष्टयानन्तरं, प्रायेण एक-चत्वारिंशद्-वर्षानन्तरं, भारतस्य युवानः, सुताः पुत्र्यः च हॉकी-क्रीडायां पुनरेकवारं प्राण-प्रवेशं कृतवन्तः | अथ च, भवेन्नाम बहूनां पदकानां प्राप्तिः, परञ्च यावदवधि, हॉकी-क्रीडायां पदकं नैव लभ्यते चेत्, भारतस्य नैकोऽपि नागरिकः विजयस्य आनंदम् अनुभवितुं नैव शक्नोति, अपि च, अस्मिन् क्रमे ओलंपिक-क्रीडा-महोत्सवे हॉकीपदकम् अवाप्तम्, दशक-चतुष्टयानन्तरम् अवाप्तम् | भवन्तः कल्पयितुं शक्नुवन्ति - मेजरध्यानचंद-वर्यस्य हृदि, तस्य आत्मनि, सः यत्रापि भवेत्, तत्र, कियती प्रसन्नता सम्भविता, तथा च, ध्यानचंद-महोदयस्य सम्पूर्णमपि जीवनं क्रीडायै समर्पितमासीत् | अत एव साम्प्रतं, यदा देशस्य युव-जनेषु, अस्मदीयेषु पुत्री-पुत्रेषु, क्रीडां प्रति यद् आकर्षणम् अवलोक्यते, पितरौ अपि, बालाः यदि क्रीडासु अग्रेसरन्ति, तदा प्रसन्नताम् अनुभवतः, एषा या उत्कण्ठा दृश्यते खलु, अवगच्छामि, एषः एव मेजर-ध्यानचंदवर्यस्य कृते उत्तमोत्तमः श्रद्धांजलिरस्ति | यदाऽपि क्रीडाविषये चर्चा भवति तदा स्वभावतः अस्मत्समक्षं अखिलयुवसन्ततिः समागच्छति। यदा च वयं यूनः प्रति सावधानम् वीक्षामहे तर्हि बहुपरिवर्तनं दरीदृश्यते। यूनां मनः परिवर्तितम् । अद्यतनाः युवानः जर्जराणां कालबहिर्गतानां च रीति-परम्पराणामपेक्षया किमपि नवाचरणं विधातुमिच्छन्ति। नवरीत्या कार्यं

कर्तुमिच्छन्ति। युवमनः पूर्वनिर्मितमार्गेषु गन्तुं नैव ईहते अपितु नूतनमार्गनिर्माणं योजयति। एतेन अज्ञातमार्गेषु पदसंधारणं कल्पते। नूतनगन्तव्यं, नवलक्ष्यं, नवमार्गं, नवाकांक्षां च करोति। युवा यदा मनसि किमपि निर्धारयति, तदा प्राणपणेन सन्नद्धः भवति। अहर्निशं परिश्रमं करोति। वयं पश्यामः यत्किंचित्कालपूर्वमेव भारतेन स्वीयम् अन्तरिक्ष-क्षेत्रं विवृतीकृतं युवजनैश्च सत्वरमेव तदवसरः अधिगृहीतः। अस्य लाभमवाप्तुं महाविद्यालयानां, विश्वविद्यालयानां, नैजक्षेत्राणां च युवजनाः सम्मुखमागताः। मम दृढविश्वासः यदनागते उपग्रहाणां अधिसंख्यम् अस्माकं युवभिः छात्रैः महाविद्यालय-विश्वविद्यालय-प्रयोगशालासम्बद्धैश्च अध्येतृभिः अभिकल्पितं भविष्यति।

यत्र कुत्रापि वयं पश्यामः, कस्मिन्नपि परिवारे गच्छामः, कियान् अपि सम्पन्नः शिक्षितः वा परिवारः भवेत्; तत्रत्य-युवजनैः सह यदा सम्भाषणं कुर्मः तदाऽसौ पारिवारिक-परम्पराभ्यः विचलनं प्रदर्शयति। “स्टार्टप् करिष्यामि” अथवा “स्टार्टप्-क्षेत्रे गमिष्यामि” इति घोषयति। अस्यार्थः यत्तस्य मनः संशयं स्वीकर्तुं उत्सुकम् । अनेनैवाद्य लघु-नगरेष्वपि स्टार्टप्-संस्कृतेः विस्तरः जायते। एतस्मिन्नहं उज्ज्वलभविष्यं अवलोकयामि। कतिपय-दिनपूर्वमेव अस्माकं देशे क्रीडनकानां चर्चा प्रावर्तत। यदैषः विषयः अस्माकं यूनां मनसि समागतः तदा तैः अखिलसंसारे भारतीय-क्रीडनकानामभिज्ञानं स्थापयितुं संकल्पितम् । साम्प्रतं नूतनप्रयोगाः विधीयन्ते। संसारे क्रीडनकाना- मापणिः बहुविस्तृतास्ति।

प्रायः षट् वा सप्तलक्षकोटि-रूप्यकमितो व्यापारः भवति। साम्प्रतं तस्मिन् भारतस्यांशः अतिसीमितः । परं कथं क्रीडनकनिर्माणं भवेत्, क्रीडनकानां वैविध्यं कीदृशमस्तु, क्रीडनकेषु कीदृशः प्रविधिः भवतु, बालमनोविज्ञानानुरूपं क्रीडनकं कीदृशं स्यादित्यादिषु विषयेषु अस्माकं देशीयाः युवानः अवधानं कुर्वन्ति, योगदानं च कर्तुमीहन्ते।

सखायः, अन्यश्चैकः विचारः यश्चित्तं मोदयति विश्वासं च दृढयति; तद्भवद्भ्यः ज्ञापितं भवेत्; यदस्माकं स्वभावः शिथिलः अस्थिरश्चावर्तत तस्य स्थाने मम देशीयानां यूनां मनांसि साम्प्रतं सर्वश्रेष्ठं प्रति केन्द्रितानि सन्ति । असौ सर्वोत्तमं, सर्वोत्कृष्टरीत्या च कर्तुमिच्छति। एषः स्वभावः राष्ट्रस्य महत्-शक्तिरूपेण प्रतिष्ठितोऽस्ति।

सखायः, साम्प्रतं ओलम्पिकायोजनेन महत्प्रभावः उपपादितः। ओलम्पिकानन्तरं पैरा-ओलम्पिकस्पर्धाः आयोज्यन्ते। एतासु क्रीडासु विश्वापेक्षया देशेन अल्पतरमधिगतं स्यात् किन्तु विश्वासोत्पादनार्थं तु प्रभूतमधिगतम् । अद्य युवजनाः न केवलं क्रीडां प्रति अपितु तत्सम्बद्ध-सम्भावनां प्रत्यपि अवलोकयन्ति। असावस्य आमूल-परिवेशं सूक्ष्मतया निरीक्षते, तस्य सामर्थ्यं अवगच्छति, तेन च साकं आत्मानं यथाकथमपि योजयितुमिच्छति। साम्प्रतमसौ परम्परागतविषयापेक्षया नूतनं परिक्षेत्रम् अंगीकरोति।

मम देशवासिनः, यदा एतावदावेगः समुपस्थितः तदा प्रत्येकं परिवारे खेलचर्चा जायते। भवन्तः कथयन्तु, अप्येषः आवेगः शमनीयः विरमणीयः वा? नैव। न कदापि। भवन्तोऽपि सम्भवतः ममानुरूपमेव चिन्तयन्ति यत्साम्प्रतं देशे क्रीडानां, खेलानां, खेलभावनायाश्च प्रसारः नैव रोधनीयः। एषः आवेगस्तु पारिवारिके, सामाजिके, राष्ट्रिये च जीवने स्थायीकरणीयः। एषः भावः उत्साहेन सततम् ऊर्जया च परिपूरणीयः। गृहमस्तु बहिर्वा, ग्रामः नगरं वा, अस्माकं क्रीडाक्षेत्राणि जनपूरितानि भवितव्यानि। सर्वे खेलन्तु खिलन्तु च। भवद्भिः स्मृतं भवेद्यत् मया रक्तदुर्गतः 'सर्वेषां-प्रयासः' इति विषये कथितमासीत्। सर्वेषां प्रयासैरेव भारतं क्रीडासु स्वीयमपेक्षितं उन्नतत्वं अधिगमिष्यति, यस्यासौ अधिकारि वर्तते। मेजरध्यानचंदसदृशैः महानुभावैः यन्मार्गः प्रदर्शितोऽस्ति, तस्मिन्नग्रेसरणम् अस्माकं दायित्वमस्ति। वर्षाणामनन्तरं देशे ईदृशः कालखण्डः समागतः यदा खेलानां प्रतिपरिवारे, समाजे, राज्ये राष्ट्रे च जनाः एकमनसा संयुक्ताः भवन्ति।

मम प्रियाः युवानः, एतदवसरस्य सदुपयोगेन अस्माभिः विविधक्रीडासु कौशलमधिगन्तव्यम् । प्रतिग्रामेषु खेलस्पर्धाः सततमायोजनीयाः। स्पर्धया एव खेलविस्तरः विकासश्च भवति। क्रीडकाः विकसन्ति। आगच्छन्तु! वयं देशवासिनः स्वीय-यथासंभव-योगदानेन एतत्खेलागतिं अग्रेसारयाम। 'सबका प्रयास' इति 'सम्भूय-प्रयासः' इति मन्त्रेण स्वप्नं साकारं करवाम।

मम प्रियाः देशवासिनः, श्वो जन्माष्टमीमहापर्व अप्यस्ति। जन्माष्टमी अर्थात् भगवतो योगेश्वरस्य श्रीकृष्णस्य जन्मोत्सवः। वयं भगवतः सर्वरूपैः परिचिताः स्मः। नटखट-इति चञ्चल-कन्हैयातः विराट्-रूपधारकं कृष्णं यावत्, अपि च शास्त्रतः शस्त्रसामर्थ्यधारकं कृष्णं यावत्। कलां, सौन्दर्यं, माधुर्यं च यावत्; कृष्णः सर्वत्रास्ति। अहमेतत् वर्णयामि यतोहि जन्माष्टमीतः कतिपयदिनपूर्वं मयैकः रुचिकरः अनुभवः प्रत्यक्षीकृतः यस्य वर्णनार्थं मम मनः उत्सुकं वर्तते। भवद्भिः स्मृतं भवेद्यत् एतन्मासस्य विंशतितमे दिनांके भगवतः सोमनाथस्य मन्दिरसम्बद्धानां निर्माणकार्याणां लोकार्पणं विहितमस्ति। सोमनाथमन्दिरतः त्रि-चतुर्किलोमीटरमितान्तराले एव भालकातीर्थमस्ति। अस्मिन् तीर्थे भगवता श्रीकृष्णेन पृथिव्यां स्वीयजीवनस्य अन्तिमक्षणाः यापिताः । अस्मिन्लोके स्वीयलीलानां समापनं तत्र विहितमासीत्। सोमनाथन्यासेन अस्मिन्क्षेत्रे विकासस्य अनेके उपक्रमाः प्रचाल्यन्ते। भालकातीर्थक्षेत्रे सम्पाद्यमानानां विकास- कार्याणां विषये चिन्तयन् मम दृष्टिः एकया सुन्दरकलापुस्तिकया आकृष्टा। एषा पुस्तिका केनापि ममावासाद् बहिः मम कृते न्यस्ताऽसीत्। अस्यां भगवतः कृष्णस्य अनेकरूपाणां भव्यचित्राणि वर्तन्ते । मया यदा पुस्तिकायाः पृष्ठपरिवर्तनं आरब्धं तदा मम जिज्ञासा अधिकतरा संजाता। यदा मयाऽस्याः चित्राणि अवलोकितानि तदा तेषु लिखितसन्देशाः पठिताः। येन मम मनः तया साकं मेलनार्थं उत्सुकम् अवर्तत। मम कार्यालयेन तया सम्पर्कः साधितः। अन्यस्मिन्नेव दिनेऽसौ आमन्त्रिता । तानि चित्राणि, श्रीकृष्णस्य विविधच्छवीः च दृष्ट्वा मम जिज्ञासा भृशमभिवर्धिता। अस्यामेव जिज्ञासायां मम

सम्पर्कः जदुराणीदासी-महाभागया अभवत्। एषा अमेरिकादेशीयास्ति। जन्म, लालनं पालनं च अमेरिकायामेवाभवत्। असौ इस्कॉन्-सम्बद्धास्ति । हरेकृष्ण-अभियानेन युक्तास्ति। भक्तिकलायाम् असौ अतीव निपुणास्ति। भवन्तः जानन्ति यत् द्विदिवसानन्तरमेव सेप्टम्बर्-मासस्य प्रथमदिवसे इस्कॉन्-संस्थापकस्य श्रील-प्रभुपादस्वामिनः एकशतोत्तर-पंचविंशतिमिता जयन्ती आगमिष्यति । अस्मिन्नेव सन्दर्भे जदुराणीदासीमहाभागा भारते समागतास्ति। मम समक्षं सर्वप्रथमं प्रश्नमासीद्यत् यस्याः जन्म अमेरिकायामभवत्, या च भारतीयभावैः नितान्तमनभिज्ञा अवर्तत; सा भगवतः कृष्णस्य एतावन्ति मोहकचित्राणि कथं कर्तुमर्हति। तया साकं मम विस्तृतचर्चा अभवत्, परमहं तस्य कञ्चिदेवांशमत्र प्रस्तौमि।

प्रधानममन्त्रिवर्यः : जदुराणीमहोदये! हरे कृष्ण! अहं भक्तिकलायाः विषये किञ्चित् पठितवान् परम् एतस्मिन् विषये अस्माकं श्रोतॄणां कृते इतोऽ पि बोधयतु । एतदर्थं भवत्याः उत्साहः रुचिः च उत्कृष्टे स्तः।

जदुराणीमहोदया - तर्हि भक्तिकला, अस्माकं सविधे bhakti art illuminations इत्यत्र एकः लेखः अस्ति यः बोधयति यत् एषा कला मनोनिर्मिता काल्पनिकी वा नास्ति, अपि तु प्राचीनवैदिकशास्त्राधृता अस्ति, यथा ब्रह्मसंहिता इति । वें ओंकाराय पतितं स्क्लितं सिकंद, वृन्दावनस्य गोस्वामी स्वयं भगवतः ब्रह्मणः। ( वें ओंकाराय पतितं स्क्लितं सिकंद, from The Goswami's of Vrindavan, from the Lord Brahma himself.) 'ईश्वर: परम: कृष्ण: सच्चिदानन्दविग्रह:' सः वेणुं कथं धरति, कथं तस्य सर्वाणि इन्द्रियाणि अन्येभ्यः इन्द्रियेभ्यः कार्यं कुर्वन्ति, अथ च श्रीमद्भागवते (TCR 9.09) 'बर्हापीडं नटवरवपुः कर्णयो: कर्णिकारम्' इत्यादि सर्वं, सः कर्णयोः कर्णिका- पुष्पाणि धारयति, वृन्दावनभूमौ सर्वत्र चरणकमलयोः चिह्नानि अङ्कयति, गो-समूहाः तस्य महिमगानं कुर्वन्ति, तस्य वेणुः सर्वेषां भाग्यशालिनां प्राणिनां हृदयं मनः च आकर्षयति। तर्हि सर्वम् अपि प्राचीनेभ्यः वैदिकशास्त्रेभ्यः अस्ति, एतेषां शास्त्राणां शक्तयः पारलौकिकेभ्यः व्यक्तित्वेभ्यः आयान्ति, अथ च ये शुद्धाः प्रेमिणः एताः

आनयन्ति, वस्तुतः कला एव तेषां शक्तिः, अत एव एषा परिवर्तनकारिणी कथ्यते। एषा मम शक्तिः नैव इति।

प्रधानममन्त्रिवर्यः : जदुराणीमहोदये! भवत्याः कृते मम पार्श्वे विविधप्रकारकाः प्रश्नाः सन्ति। प्रकारान्तरेण षट्षष्ट्यधिक-नवदशशताब्दतः, अथ च, षट्-सप्तत्यधिक-नवदश-शताब्दतः शारीरिकरूपेण भवती भारतेन सह सम्पृक्ता अस्ति, किं भवती कृपया मां बोधयिष्यति यत् भारतं भवत्याः कृते किम् अस्ति?

जदुराणीमहोदया - प्रधानममन्त्रिवर्य! भारतं मम सर्वस्वम् अस्ति। कतिपयदिनानि पूर्वम् अहं राष्ट्रपतिवर्यं वदन्ती आसम् यत् भारतं प्रविधिप्रयोगे बहु अग्रे आगतम्, ट्विटर्-इन्स्टाग्राम्-आईफोन्- उन्नतभवनानि, सर्वाः च प्रमुखसुविधाः समेत्य पश्चिमं सम्यक्तया अनुसरति, परम् अहं जानामि भारतस्य वैभवम् एतेषु नास्ति। भारतस्य वैभवं यः वर्धयति सः अस्ति अत्र स्वीकृतावतारः स्वयं श्रीकृष्णः । अत्रत्याः सर्वेऽपि अवताराः । भगवान् शिवः, श्रीरामः च अत्र उद्भूतौ, सर्वाः पवित्रनद्यः अत्र, वैष्णवसम्प्रदायस्य सर्वतीर्थानि च अत्र सन्ति, अतः भारतम्, विशेषरूपेण च वृन्दावनं ब्रह्माण्डे महत्त्वपूर्णं स्थानम् अस्ति। वृन्दावनं सर्वेषां वैकुण्ठलोकानां स्रोतः, द्वारिकायाः स्रोतः, सर्वेषां भूतानाम् उत्पत्तिकारणम्, अतः अहं भारते स्निह्यामि।

प्रधानममन्त्रिवर्यः : धन्यवादः जदुराणीमहोदये! हरे कृष्ण!

सखायः, विश्वे लोकाः यदा अद्य भारतीयाध्यात्मविषये, अथ च दर्शनविषये एतावत् विचारयन्ति तर्हि अस्माकम् अपि दायित्वं भवति यत् वयं स्वीयाः एताः महत्परम्पराः अग्रे नयेम । यः कालबाह्यः सः त्यक्तव्यः एव, परं यः कालातीतः सः अग्रे अपि नेतव्यः। वयं स्वपर्वाणि आचरेम, तेषां वैज्ञानिकताम् अवगच्छेम, तत्र निहितार्थं जानीयाम | न एतावत् एव, प्रत्येकं पर्वणि कश्चन सन्देशः भवति एव, कश्चन च संस्कारः भवति | अस्माभिः ज्ञातव्यम्, जीवनीयम्, अथ च, भावि-सन्ततीभ्यः न्यासरूपेण वर्धनीयम् अपि। अहं पुनरेकवारं जन्माष्टमीपर्वणि सर्वेभ्यः देशवासिभ्यः जन्माष्टमीशुभकामनाः प्रकटयामि।

मम प्रियाः देशवासिनः, एतस्मिन् कोरोणा-कालखण्डे स्वच्छतायाः विषये मया यावत् सम्भाषणीयम् आसीत् कदाचित् तावत् न सम्भाषितम्, उत तत्र न्यूनता जाता। अहम् अपि भावयामि यत् स्वच्छताभियानं लेशमात्रं न विस्मर्तव्यम्। राष्ट्रनिर्माणाय सर्वेषां प्रयासः कथं सर्वविकासं करोति, एतस्य उदाहरणानि अस्मान् प्रेरयन्ति, सहैव किमपि कर्तुं नवोर्जसा आपूरयन्ति । नवविश्वासं पूरयन्ति, अस्माकं सङ्कल्पे प्राणवायोः सञ्चरणं कुर्वन्ति। एतत् वयं सम्यक्- प्रकारेण जानीमः यत् यदा कदा स्वच्छभारताभियानस्य विषयः आयाति तदा इंदौरनगरस्य नाम आयाति एव। यतः इंदौरनगरेण स्वच्छतासन्दर्भे स्वकीया विशेषछविः निर्मिता, अथ इन्दौर-नागरिकाः एतदर्थम् अभिनन्दनयोग्याः अपि । अस्माकम् एतत् इन्दौरनगरम् अनेकेभ्यः वर्षेभ्यः 'स्वच्छ भारत रैंकिंग्'-इत्यस्मिन् प्रसङ्गे प्रथमस्थाने अस्ति। इदानीम् इंदौरवासिनः स्वच्छभारतस्य मानाङ्केन न सन्तुष्टाः, ते अग्रेसराः भवितुम् अर्हन्ति, विशिष्टं किमपि कर्तुम् इच्छन्ति । अथ तैः मनसि निर्णीतम् अस्ति यत् 'Water Plus City', कर्तुं पूर्णमनोयोगेन निरताः स्याम। 'Water Plus City' अर्थात् एतादृशं नगरं यत्र संशोधनं विना दूषितं जलं कस्मिन् अपि सार्वजनिकजलस्त्रोतसि न प्रवहेत्। अत्रत्य-नागरिकैः अग्रे आगत्य स्वीयाः नालिकाः सीवरलाइन्- इति मल-नालिकाभिः संयोजिताः । स्वच्छताभियानम् अपि प्रवर्तितम्, अथ च, एतेन कारणेन सरस्वत्यां कान्ह-नद्यां च प्रवाह्यमानं दूषितजलम् अत्यन्तं न्यूनं जातम्। परिणामतः परिष्कारः दृश्यते | अद्य यदा अस्माकं देशः स्वतन्त्रतायाः अमृतमहोत्सवम् आचरति तदा अस्माभिः अवधातव्यं यत् स्वच्छभारताभियानस्य संकल्पः अस्माभिः मन्दं कदापि नैव करणीयः। अस्माकं देशे यावन्ति अधिकानि नगराणि 'Water Plus City' इति भविष्यन्ति तावती एव स्वच्छता एधिता, अस्मदीयाः नद्यः अपि स्वच्छाः भविष्यन्ति, अथ च जलरक्षणस्य मानवीयं दायित्वम् अपि संस्कारान्वितं भविष्यति।

सखायः, मम पुरतः उदाहरणमेकं बिहारस्य मधुबनीतः अस्ति । मधुबन्यां डॉ.राजेन्द्र-प्रसाद-कृषि-विश्वविद्यालये तत्रत्येन स्थानीय-कृषि-विज्ञानकेन्द्रेण च सम्मिल्य उत्तमः कश्चन प्रयत्नः विहितः । अस्य लाभः कृषकेभ्यः तु जायमानः एव वर्तते, स्वच्छ-भारत-अभियानाय अपि नूतना शक्तिः अवाप्ता ।

विश्वविद्यालयस्य अस्य उपक्रमस्य नाम वर्तते - सुकृषि-प्रतिमानम्, सुकृषिप्रतिमानस्य लक्ष्यं वर्तते यत् ग्रामेभ्य: प्रदूषणस्य न्यूनीकरणम् । अस्य प्रतिमानस्य अन्तर्गतं ग्रामीणेभ्य: कृषकेभ्य: गोमयः, कृषिक्षेत्रेभ्यः गृहेभ्यः च अवकरः एकत्रीक्रियते । एतदाधारीकृत्य च तेभ्यः अनिलकोषाय धनं दीयते । य: अवकर: ग्रामेभ्यः एकत्रीक्रियते तन्निवारणाय कृमि-उर्वरकस्य निर्माणमपि क्रियते । सुकृषि-प्रतिमानस्य चत्वारः लाभाः तु प्रत्यक्षतया दृश्यन्ते । प्रथमस्तु ग्रामेभ्य: प्रदूषणात् मुक्तिः, द्वितीयः ग्रामेभ्यः मालिन्यात् मुक्तिः, तृतीयः ग्रामीणेभ्यः अनिलकोषार्थं धनप्राप्तिः, चतुर्थः च कृषकेभ्य: जैविक-उर्वरकम् | भवन्त: चिन्तयन्तु, एतादृशाः प्रयत्नाः अस्माकं ग्रामाणां कियतीं शक्तिं वर्धयितुं शक्नुवन्ति ? अयमेव आत्मनिर्भरविषय: वर्तते । अहम् एतस्य देशस्य प्रत्येकम् पञ्चायतं कथयामि यत् एतादृशमेव किमपि कर्तुं ते अपि स्वस्मिन् स्थाने चिन्तयन्तु ।

सखायः, यदा वयं किमपि लक्ष्यम् अधिकृत्य अग्रेसरामः तर्हि निश्चयेन परिणामाः लभ्यन्ते एव | साम्प्रतं भवन्तः एव तमिलनाडु-राज्यस्य शिवगङ्गाजनपदस्य काञ्जीरङ्गाल-पञ्चायतं पश्यन्तु | अनेन लघुना पञ्चायतेन किं कृतम्? भवन्तः अवकरेभ्य: धनसम्पादनरूप-प्रतिमानम् अत्र द्रक्ष्यन्ति । अत्र ग्रामीण-पञ्चायतेन स्थानीयै: जनैः सह सम्मिल्य अवकरेभ्यः विद्युन्निर्माणसम्बद्धा स्थानीया एका परियोजना स्वस्मिन् ग्रामे कृता । सम्पूर्णग्रामेभ्यः अवकराः एकत्रीक्रियन्ते, तेभ्य: विद्युत् निर्मीयते, अवशिष्टाः च उत्पादाः कीटनाशकरूपेण विक्रीयन्ते अपि । प्रतिदिनं द्वि-टन-मितस्य अवकरस्य निस्तारणक्षमता वर्तते अस्य ग्रामस्य विद्युत्-उत्पादन-केन्द्रस्य । अनेन निर्मीयमाणा विद्युत्, ग्रामस्य मार्गीय-प्रकाशव्यवस्थायै, अन्यस्मै आवश्यकोपयोगाय च जायमाना वर्तते । अनेन पञ्चायतस्य धनं तु अवशिष्यते एव, तच्च धनम् अन्यविध-विकासकार्याय अपि प्रयुज्यते । इदानीं भवन्तः एव वदन्तु यत् तमिलनाडु-स्थितस्य शिवगङ्गाजनपदस्य लघुपञ्चायतः अस्मभ्यं सर्वेभ्यः देशवासिभ्यः प्रेरणाप्रदः वर्तते वा न वा? अद्भुतं साधिवन्त: खलु इमे ।

मम प्रियाः देशवासिनः, 'मनकीबात'-प्रसारणं साम्प्रतं भारतस्य सीम्नि एव परिमितं नैव वर्तते । विश्वस्य विभिन्नेषु कोणेषु 'मनकीबात' इत्यस्मिन् सन्दर्भे चर्चा भवति । विदेशेषु निवासं कुर्वत्सु जनेषु ये भारतीयाः सन्ति तेऽपि मह्यं विनूतनाः सूचना: प्रयच्छन्तः भवन्ति । विदेशेष्वपि ये अद्भुताः कार्यक्रमाः प्रचलन्ति तेषां विषये 'मनकीबात' इत्यनेन कार्यक्रम-माध्यमेन, भवद्भ्यः सूचनाप्रदानं कदाचित् मह्यं रोचते। अद्यापि अहं कतिपयान् एतादृशान् जनान् परिचाययामि । भवद्भ्यः किञ्चित् ध्वनिं श्रावयामि । अवधान-पुरस्सरं शृण्वन्तु ।

[रेडियो-युनिटी-नाइन्टी एफ्.एम्.]

नमोनमः सर्वेभ्यः | मम नाम गङ्गा | भवन्तः शृण्वन्तु रेडियो-युनिटी-नवति-एफ्.एम्. -'एकभारतं श्रेष्ठ-भारतम्' | अहम् एकतामूर्तेः मार्ग- दर्शिका एवं रेडियो-युनिटी-माध्यमे आर्.जे. अस्मि | अद्य संस्कृतदिनम् अस्ति | सर्वेभ्यः बहव्यः शुभकामनाः सन्तु | सरदार-वल्लभभाई-पटेलमहोदयः 'लौहपुरुषः' इत्युच्यते | २०१३-तमे वर्षे लौहसंग्रहस्य अभियानम् प्रारब्धम् | १३४-टन-परिमितस्य लौहस्य गलनं कृतम् | झारखण्डस्य एकः कृषकः मुद्गरस्य दानं कृतवान् | भवन्तः शृण्वन्तु रेडियो-युनिटी-नवति-एफ्.एम् - 'एकभारतं श्रेष्ठ-भारतम्' |

[ रेडियो-युनिटी-नाइन्टी-एफ्.एम्.]

सखायः, भाषां तु भवन्त: अवगतवन्त: स्युः । आकाशवाण्याम् एषः संस्कृतेन वार्तालाप: क्रियमाण: वर्तते । या च वार्तालापं कुर्वती अस्ति- सा आर्.जे. गङ्गा । आर्.जे. गङ्गा गुजरातस्य Radio jockeys- इत्यस्य गणसदस्या वर्तते । तासां सख्यः वर्तन्ते - R.J नीलम, R.J गुरुः, R.J. हेतल - इत्यादयः । एते सर्वे सम्मिल्य गुजराते केवड़िया-स्थाने साम्प्रतं संस्कृतभाषायाः सम्मान-वर्धनाय सन्नद्धाः सन्ति । यत्र विश्वस्य सर्वाधिका उन्नता प्रतिमा, अस्माकं देशस्य गौरवभूता, एकतायाः प्रतिमा (statue of unity) विद्यते । तस्य केवड़िया-स्थानस्य विषये वदामि । एते सर्वे एतादृशा: - रेडियो-जोकीज़- इति

कार्यक्रम-संचालकाः सन्ति, ये सहैव नैकविधाः भूमिका: निर्वहन्ति । एते पर्यटक-मार्गदर्शकरूपेण स्वीयां सेवां प्रयच्छन्ति । तेन सहैव कम्युनिटि-रेडियो-इनिशियेटिव्-रेडियो-युनिटी-नाइन्टी-एफ्.एम्.- रेडियो-इत्यादिकं च सञ्चालयन्ति । एते RJ's स्वीयश्रोतृभिः सह संस्कृतेन वार्तालापं कुर्वन्ति। तेभ्य: च संस्कृत-माध्यमेन सूचना: प्रयच्छन्ति ।

सखायः, अस्माकं देशे संस्कृतविषये प्रोक्तमस्ति -

अमृतं संस्कृतं मित्र! सरसं सरलं वचः |

एकतामूलकं राष्ट्रे, ज्ञान-विज्ञान-पोषकम् ||

अर्थात्, अस्मदीया संस्कृतभाषा सरसापि, सरलापि | संस्कृतं स्वीय-विचाराणां, निज-साहित्यस्य च माध्यमेन ज्ञान-विज्ञानयोः राष्ट्रस्य च एकतामपि पोषयति, एनां दृढतरां विदधाति | संस्कृत-साहित्ये मानवतायाः ज्ञानस्य च एतादृगेव दिव्यदर्शनं वर्तते यद्धि कमपि आकर्षयितुम् अर्हति | नातिचिरमेव, अहं बहूनां तादृशानां जनानां विषये ज्ञातवान्, ये हि विदेशेषु संस्कृत-पाठनस्य प्रेरकं कार्यं कुर्वन्ति | एतादृशः एव जनः अस्ति - श्रीमान् रटगर-कोर्टेनहॉर्स्ट, यो हि Ireland-देशे संस्कृतस्य विख्यातः विद्वान् शिक्षकश्च अस्ति, तत्रत्यान् बालान् च संस्कृतं पाठयति | अत्र अस्मदीये पूर्वस्मिन् दिग्विभागे भारत-Thailand-देशयोः मध्ये च सांस्कृतिक-सम्बन्धानां दृढीकरणे संस्कृतभाषायाः अपि महत्त्वाधायिनी भूमिकास्ति | डॉ.चिरापत्-प्रपंडविद्या, डॉ.कुसुमारक्षामणिः, एतौ द्वावपि Thailand-देशे संस्कृतभाषायाः प्रचार-प्रसारार्थम् अतितरां महत्वपूर्णां भूमिकां निभालयतः | एतौ थाई-संस्कृतभाषयोः तुलनात्मक-साहित्यस्य रचनामपि अकुरुताम् | एतादृशः एव प्राचार्यः अस्ति - श्रीमान् बोरिस- जाखरिन्, रशिया-देशे Moscow-शासकीय-विश्वविद्यालये असौ संस्कृतं  पाठयति | असौ अनेकानि शोधपत्राणि पुस्तकानि च प्रकाशितवान् | अमुना बहूनां संस्कृत-पुस्तकानां रुसीभाषान्तरम् अपि कृतम्  | एवमेव, Australia-देशस्य Sydney Sanskrit-

विद्यालयः, बहुषु प्रमुख- संस्थानेषु अन्यतमः, यत्र विद्यार्थिभ्यः संस्कृत-भाषा पाठ्यते | एते विद्यालयाः बालानां कृते Sanskrit-व्याकरण-शिविराणि, संस्कृत-नाटकानि, संस्कृत-दिवस-सदृशान् च कार्यक्रमान् अपि आयोजयन्ति |

सखायः, सद्यः व्यतीतेषु दिनेषु ये प्रयासाः अनुष्ठिताः, तेषां कारणात् संस्कृतविषयिणी नवीना जागर्तिः प्रतिष्ठते | कालोऽयं समागतः यद्वयम् अस्यां दिशि स्वीयान् प्रयासान् इतोऽपि संवर्धयाम | अस्मदीय-दायस्य संरक्षणम्, तस्य सम्भालनम्, नवीन-सन्ततये च प्रदानम् - एतद् अस्माकं सर्वेषां कर्तव्यं वर्तते, अथ च, भावि-वंशानाम् एषु अधिकारोऽपि अस्ति | अधुना कालोऽस्ति - एतेषां कार्याणां कृतेऽपि सर्वेषां प्रयासाः आधिक्येन विवर्धेरन् |

सखायः, यदि भवन्तः एतादृग्-प्रयासेषु संलग्नं कमपि जनं जानन्ति, एतादृशी काचिदपि सूचना भवतां पार्श्वे अस्ति चेत्, कृपया #CelebratingSanskrit- इति-पुटेन साकं सामाजिक-संचार-माध्यमेषु तत्-सम्बद्धां सूचनाम् अवश्यमेव सम्विभाजयन्तु |

मम प्रियाः देशवासिनः, आगामिषु कतिपयेष्वेव दिनेषु 'विश्वकर्मा-जयंती' अपि आगमिष्यति | अस्मदीय-चिन्तनेषु भगवान् विश्वकर्मा विश्वस्य सृजन-शक्तेः प्रतीकत्वेन आमान्यते | योऽपि स्वीय-कौशलेन कस्यचिदपि वस्तुनः निर्माणं करोति, सृजति, भवतु तत् सीवनं वा सूचिकर्म, अस्तु वा तन्त्रान्शः वा उपग्रहः, एतत् सर्वं भगवतः विश्वकर्मणः प्रकटीकरणम् अस्ति | जगति, भवतु नाम कौशलस्य अभिज्ञानं साम्प्रतं नवीन-पद्धत्या, किञ्च अस्मदीयाः ऋषयस्तु सहस्रशो वर्षेभ्यः कौशलं प्रमाणञ्च सबलं ख्यापितवन्तः | ते कौशलं, कलाप्रावीण्यं, दाक्षिण्यं च, आस्थया योजयित्वा एतानि अस्माकं जीवनदर्शनस्य अङ्गत्वेन प्रतिष्ठापितवन्तः | अस्माकं वेदाः अपि अनेकानि सूक्तानि भगवते विश्वकर्मणे समर्पितवन्तः | सृष्टेः यावत्यः अपि बृहत्यः रचनाः सन्ति, यान्यपि नूतनानि बृहन्ति च कार्याणि जातानि, अस्मदीयेषु शास्त्रेषु, तेषां श्रेयः भगवते विश्वकर्मणे

एव समर्पितोऽस्ति | एतत्तु एकतः अस्य वृत्तस्य प्रतीकं वर्तते यत् संसारे यः कश्चन अपि विकासः नवाचारः वा भवति, सः कौशल-माध्यमेन एव भवति | भगवतः विश्वकर्मणः जयन्त्याः तस्य च पूजायाः पृष्ठभूमौ अयमेव भावः प्रवर्तते | अस्माकं शास्त्रेषु इदमपि प्रोक्तम् -

विश्वस्य कृते यस्य कर्मव्यापारः सः विश्वकर्मा |

अर्थात् यः सृष्ट्या निर्माणेन च सम्बद्धानि सर्वाणि कार्याणि करोति सः विश्वकर्मा अस्ति | अस्माकं शास्त्रानुसारेण अस्मान् परितः निर्माण- सृजनयोः संलग्नाः यावन्तोऽपि कौशलवन्तः, कलाप्रवीणाः सन्ति, ते भगवतः विश्वकर्मणः रिक्थ-रूपाः सन्ति | एतेषाम् अभावे वयं निज- जीवनं कल्पयितुमपि नैव शक्नुमः | भवन्तः विचारयन्तु, भवतां गृहे विद्युत्-प्रबन्धने किञ्चित् काठिन्यं भवेत्, तदवसरे भवतः विद्युत्कारः सुलभः नास्ति चेत्, किं भविता? भवतां समक्षं कियती बृहती परिदेवना समापतिता | अस्मदीयं जीवनम् एतादृशैः एव बहुभिः कौशल-पूर्णैः जनैः प्रचलति | भवन्तः भवतः परितः अवलोकयन्तु, भवन्तु नाम ते लौहकर्मिणः वा मृद्-भाण्ड-निर्मातारः, सन्तु काष्ठ-सामग्री-निर्मातारो वा विद्युत्काराः, ते गृहाणां वार्णिकाः वा स्वच्छताकर्मिणो वा जङ्गम-दूरभाष-laptop-संगणक-परिष्कारकाः वा भवेयुः - एते सर्वेऽपि सखायः निज-कौशल-कारणेन एव अभिज्ञायन्ते | आधुनिक-स्वरूपे एतेऽपि विश्वकर्माणः एव वर्तन्ते | परञ्च सखायः, अस्य अपरोऽपि पक्षः अस्ति, सः कदाचित् चिंताकारकोऽपि भवति, यस्मिन् देशे, यत्रत्यायां संस्कृतौ, परंपरासु, विचारेषु च, कौशलं, दक्ष-जनशक्तियुताश्च जनाः भगवता विश्वकर्मणा संयोजिताः स्युः, तत्र स्थितयः कथं परिवर्तिताः? एकस्मिन्काले, अस्मदीये पारिवारिक-जीवने, सामाजिक-जीवने, राष्ट्र- जीवने च कौशलस्य महान् प्रभावः भवति स्म | परञ्च दासतायाः सुदीर्घे कालखंडे कौशलाय एतादृक्-सम्मानप्रदात्री भावना शनैः शनैः विस्मृता जाता | विचारसरणी किञ्चित् तादृशी संजाता यत् कौशला- धृतानि कार्याणि लघूनि वा क्षुद्राणि इति परिभावयितुम् आरब्धम् | साम्प्रतं पश्यन्तु, अशेष-विश्वं सर्वाधिकं

बलं कौशलार्थमेव प्रयच्छति | भगवतः विश्वकर्मणः पूजापि केवलम् औपचारिकताभिरेव नैव पूर्णा | अस्माभिः कौशलं नूनं सम्माननीयम्, कौशलञ्च अधिगन्तुं अवश्यमेव श्रमः आचरणीयः | कौशलावाप्तिः नूनं गर्वविषयिणी भवेत् | यदापि वयं किमपि किञ्चिदपि नवीनम् आचरेम, ईषत् नवाचारम् करवाम, किञ्चित् एतादृक् सर्जनं करवाम येन समाजस्य हितं भवेत्, जन-जीवनं सरलं स्यात्, तदा अस्मदीया विश्वकर्मणः पूजा सार्थकी भविता | अद्य जगति दक्ष-जनानां कृते अवसराणां न्यूनता नास्ति | प्रगतेः बहवः पन्थानः सम्प्रति कौशलेन सन्नद्धाः भवन्ति | तर्हि आगच्छन्तु, अस्मिन् क्रमे वयं भगवतः विश्वकर्मणः पूजावसरे आस्थया सहैव तस्य सन्देशमपि स्वीकर्तुं संकल्पयाम | अस्माकं पूजायाः भावः अयमेव स्यात् यत् वयं कौशलस्य महत्वम् अवगमिष्यामः, तथा च, कौशलयुतान्, भवतु नाम तेषां किमपि कार्यम्, तान् पूर्णतया सम्मानयिष्यामः |

मम प्रियाः देशवासिनः, कालोऽयमस्ति - स्वाधीनतायाः पञ्च-सप्ततितमवर्षस्य | वर्षेऽस्मिन् तु अस्माभिः प्रतिदिनं नवं नवं संकल्पनीयम्, किमपि नूतनं विचारणीयम्, तथा च, किमपि अभिनवं कर्तुं स्वीया काङ्क्षा विवर्धनीया | अस्मदीयं भारतं यदा स्वाधीनतायाः शतं वर्षाणि पूर्णतां नेष्यति, तदा अस्मदीयाः इमे संकल्पाः एव अस्य सफलतायाः निधाने दृष्टिपथम् आगमिष्यन्ति | अत एव, नावसरोऽयम् अस्माभिः विलोपनीयः | अस्माभिः एतदर्थम् अधिकाधिकं स्वीयं योगदानं करणीयम् | तथा च, एतेषु अनुष्ठीयमानेषु प्रयासेषु, अस्माभिः अपरमेकं तथ्यं सुस्मरणीयम् | औषधमपि, अनुशासनमपि | देशे साम्प्रतं यावत् द्विषष्टि-कोटितोऽपि अधिका सूच्यौषधि-मात्रा प्रदत्ता, किञ्च, एवं सत्यपि अस्माभिः सुबहु अवधानं सन्धारणीयम्, सतर्कता च अनुपालनीयास्ति | अपि च नूनम्, सर्वदानुरूपं, यदापि भवान् किमपि नूतनं कुर्यात्, नवीनं विचारयेद्वा, तदा तत्र मामपि नूनं समावेशयतु | भवतां पत्राणि सन्देशान् च प्रतीक्षिष्ये | अनया कामनया साकं,

भवतां सर्वेषां कृते आगम्यमानानां पर्वणां सन्दर्भे पुनरप्येकवारं भूयान्सि वर्धापनानि | कोटिशो धन्यवादाः |

नमस्कारः!

*****

[भाषान्तरम् - डॉ.श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

अणुप्रैषः - baldevanand.sagar@gmail.com